No. ४६२३

Title जातकर्म नामकर्म पद्धतिः

Author ×

Extent ५ पत्राणि Age ×

Subject सूत्रपद्धतिः

जातकर्मनामकर्मपद्धतिः

नामकर्म

प्रथमपुत्रजातमात्रे हिरण्यश्राद्धं
कवितमाते
श्राद्धमिति

॥श्रीगणेशायनमः॥ ॥अथजातकर्मवक्ष्यामः॥ ॥कुमा
रेजातेअच्छिन्नायांनालायांअत्रस्तरणाद्याघाराज्यभागः
पद्धिकः॥कुमारेजातेअच्छिन्नायांनालायांउपलेपनोल्लेख
नाद्याघाराज्यभागंकृत्वा॥पुरस्तात्आज्याहुतिचतुष्टयंहु
त्वा॥आज्याहुतीर्जुहोति॥ॐभूःस्वाहा॥ॐभुवःस्वाहा॥ॐस्वः
स्वाहा॥ॐभूर्भुवःस्वःस्वाहा॥४॥बालकंमूर्द्ध्नित्रिरवघ्राय॥
तत्ऋचाप्राणिहि१॥यजुषासमनिहि२॥साम्नोदनीहि३॥१

एतैस्त्रिभिर्मंत्रैः प्रतिमंत्रं त्रिर्बद्धिर्दृष्टास्त्रैः निश्वासं बालकस्यो
परि ष्टाकरोति ॥ ततो घृतमधुनी एकीकृत्य दध्युदके च ए
कीकृत्य । ततश्च त्वार्यप्येकीकुर्यात् ॥ अथवा ब्रीह्यिय वो
वासंति घृष्य अभ्यवच हारयोग्यं कृत्वा ॥ ॐ प्रातयच्छामि
मधुमन्मुखाय वेदं प्रसूतं सवित्रा मघोना । आयुष्मान्गु
पितादेवताभिः शतंजीव शरदोलोक अस्मिन् ॥ देवदत्त
अमुकशर्मन् ॥ त्रिः प्राशयेत् ॥ अंगुष्ठेचोपकनिष्ठिकया

सूवर्णमुद्रिकां गृहीचात्रिः प्राशयेत्॥ तस्यसुवर्णमुद्रिकां
शणसूत्रेण विगृथ्य बालकस्य दक्षिणहस्ते बध्नाति॥ ना
मास्य दधाति॥ कखचछटठतथपफशषस एतानि मु
क्ता॥ शेषाणांमध्ये एकाक्षरमादौ कुर्यात्॥ यरलव इत्येषां
चतुर्णामक्षराणां एकं मध्ये कृत्वा॥ ततः कृत् प्रत्ययांतं कृ
त्वा॥ व्यामिश्रतद्धितप्रत्ययांतमपिन कुर्यात्॥ द्व्यक्षरं॥
चतुरक्षरं वा॥ यथ्यचाषलक्षरं॥ जानीयातामिति॥ अपरे 2

त्वंव्याचक्षते॥यत्सर्वेपुरुषाणांपितृपितामहानांकृतंतदे
वनामकुर्यात्॥कुमारस्यदक्षिणेकर्णेवाशितित्रिः॥ वा
क्३॥ॐवाग्देवीमनसासंविदानाप्राणेनवत्सेनसहेंद्रप्रो
क्ता॥जुषतांत्वासोमनसायदेवीमेंहीमंद्राचाणीवाणीवी:।
ॐसलिलाःस्वयंभूरितिअनेनमंत्रेणकुमारमनुमंत्र्य॥ततः
ततःएकादशेह्नितत्सुवर्णेब्राह्मणायदद्यात्॥अथगृहे
चाधारयेत्॥ततोमहाव्याहृतिचतुष्टयंकृत्वा८ततःपादि

कः स्विष्टकृत।उदकोपः।सप्तकंञ्कुर्यात्॥तत्रशेषंसमाप
नीयमिति॥ ॥छ॥इतिजातकर्मः॥समाप्तः॥ ॥अथनामक
र्मवक्ष्याम॥ ॥अस्मिन्नेवाग्नौजातकर्महोमकृतः॥तस्मिन्ने
वेदमपिकर्त्तव्यं॥अत्रस्तर्णोराज्यभागानिर्विकल्पाः॥अग्र
दणप्रोक्षणानिकुर्यात्॥मातापितरौकुमारस्नातौ।अहत
वाससौभूत्वा॥उपलेपनोल्लेखनाद्याघाराज्यभागांतंकृत्वा॥
ततोऽस्यांतिथौकुमारोजातः॥स्तांतिथिंकृत्वा॥प्रतिपदौ 3

द्वितीयायै २ तृतीयायै ३ चतुर्थ्यै ४ पंचम्यै ५ षष्ठ्यै ६ सप्तम्यै ७
अष्टम्यै ८ नवम्यै ९ दशम्यै १० एकादशम्यै ११ द्वादश्यै १२ त्र
योदश्यै १३ चतुर्दश्यै १४ पौर्णमास्यै १५ ॥ अमावास्यायै ।
१६ ॥ अनेन प्रकारेण जन्मतिथिं स्वाहाकारांतं स्थालीपा
कस्य कृत्वा ॥ नक्षत्रं जुहोति ॥ उत्तरनक्षत्रं जुहोति ॥ ततो
जन्मनक्षत्रात्पूर्वं नक्षत्रं ॥ तत्र प्रथमं देवतं कृत्वा ॥ तिद्दं
पश्चात् नक्षत्रनाम देवता जुहुयात् ॥ पश्चात् नक्षत्रं जुहोति ।

कथं जुहोतीति वक्ष्यामः ॥ ॐ अश्विभ्यां स्वाहा ॥ अश्विनी-
भ्यां स्वाहा ॥ एवं जन्मतिथि देवतास्तिस्र उत्रीणि नक्षत्रा-
णि ए तासप्त ७ च वीजुतीर्हुत्वा ॥ ततः आयुष्ये अघगी-
र्भिरयमग्निर्वरेण्यः ॥ आयुर्नो देहि जीवासस्वाहा ॥ ८
ॐ आयुर्दा अग्ने हविषा वृधानो घृतप्रतीको घृतयोनि-
रेधि ॥ घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमिह रक्षतादि-
मं स्वाहा ॥ ९ ॥ ॐ त्वं सोम महे भगं त्वं यून ऋतायते ॥ दक्षं ४

दध्नसिंद्वीवसेभस्वाहा॥१०॥स्वाहाकारांताएचमेतादशा
हुतीः१०स्थालीपाकस्यअवदानधर्मेणहुत्वा॥ततः
घोषवदाद्येवमाद्वि३वर्जं॥अत्मनोयडोच्यतेतन्नाम
धेयंप्रकाशंकृत्वा॥पुण्याहंदीर्घमायुरित्यादिस्वाप
नीयंआशीर्वादंदत्वान्तवान्॥ॐअग्नयेस्विष्टकृतेस्वा॥
उदकोपः॥यथोत्साहंदक्षिणांआचार्यायभूयसींदत्वा॥
ततोमहाव्याहृतिसर्वप्रायश्चित्तादिसप्तकंहोमेति॥तं

त्रशेषंसमापनीयमिति॥गृह्येग्रोक्तुहोति॥ ॥इतिनामक
मेसमाप्तः॥ ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥ ॥ ॥

5